विमलालहरी

रचयिता

डक्टर् प्रमोद चन्द्र मिश्रः

विमलालहरी

रचयिता

डक्टर् प्रमोद चन्द्र मिश्रः

ग्रन्थनाम : विमलालहरी

रचयिता : डक्टर प्रमोद चन्द्र मिश्रः
एम्. ओ. एल्., पि एच्. डि.
साहित्याचार्यः, कोविदः

प्रकाशिका : ओडिशासंस्कृतएकाडेमी,
भुवनेश्वरम्

प्रकाशनकालः : 2001

मुद्रणम् : रमा प्रेस्, पुरी

दूरभाषः - 27945,22145

मूल्यम् : पञ्चाशत् रूप्यकाणि

प्राप्तिस्थानम् : ओडिशासंस्कृतएकाडेमी
वशिष्ठयोगाश्रमः
टङ्कपाणिरोड्
भुवनेश्वरम् - 2
ओडिशा - (भारतम्)

समर्पणम्

तव देव पितः स्मरामि चेद्
वचनं तन्मम नेत्रयोरलम् ।
जलमश्रु पतत् करोत्यहो
लिखितं लोतकवारिपूरितम् ॥ 1 ॥

विमला जगदेकतारिके-
ति वदन् मामिह शक्तिमन्दिरे ।
अकरोर्मम सर्वमर्पितां
विपदं सम्पदमम्बिकापदे ॥ 2 ॥

मम संस्कृतशिक्षणस्य सा
विगतैवादिमकालिकी कथा ।
अधुना विमलास्तुतिं पित -
र्ब्रुवतो मे जनयत्यतिव्यथाम् ॥3 ॥

अहमस्मि समर्पितः पितः
कृपया ते परिवर्द्धितः सुतः ।
दिवसेऽद्य समर्पणस्य ते
सुमुखं नैव विलोक्यते हहा ॥ 4 ॥

क्व गतोऽसि सुतं परित्यजन्
प्रणतं व्याकुलितं विदांवर ।
मम ते खलु दर्शनं भवे -
न्न कदाचिज्जगतीतले पुन : ॥ 5 ॥

क्व मम त्रुटिरत्र काव्यगा
किमु संशोधनमत्र वेष्यते ।
नहि कोऽपि विलोक्यते क्षम :
सुकवे तत्कथने विना त्वया ॥ 6 ॥

बहुशोधनमत्र सम्भवेत्
तव तुल्यः सुलभः क्व वा कविः ।
रचितं कृपया गुरोस्तु यत्
तदिदं स्निग्धतया गृहाण मे ॥7 ॥

करयोः परिगृह्य सादरं
तव पादाम्बुजमन्तरे स्मरन् ।
विदधामि च तेऽर्पितां पित-
र्विमलाया लहरीं शुभङ्करीम् ॥8 ॥

ॐ

श्रीगणेशाय नमः

विमलालहरी

संसारार्णवतारिणि प्रमथिनि स्वश्रेयसद्वेषिणां
नित्यानन्दमयि प्रशस्तहृदये श्रीक्षेत्रधामस्थिते ।
श्रीनीलाचलमण्डने त्रिनयने दैतेयकालायिते
मातर्मे विमले तवाङ्घ्रिकमले नित्यं मतिर्मोदताम् । ॥1॥

मातस्त्वां हृदि चिन्तयामि सततं चिन्तातुरः कातरः
शक्तिं देहि विधेहि मे शिवमुमे खड्गोज्चले शोभने ।
देवि त्वं जगदेकरक्षणपरा मां रक्ष रक्ष क्षणाद्
धृत्वा शूलमलीकजल्पनपरान् दुष्टान् जनान् छिन्ध्यलम् ॥ 2॥

अम्ब ! त्वं कमला त्वमेव ललिता त्वं शारला मङ्गला
देवि त्वं ननु चर्च्चिका भगवती त्वं कालिका हिङ्गुला ।
ख्याता त्वं समलेश्वरीति जगति त्वं शक्तिरत्युज्वला
एकापि त्वमनेकनामसहिता भिन्ना जरीगृह्यसे ॥ 3 ॥

जानास्येव सदा न कोपि पुरतो नो पृष्ठतो मे भुवि
स्वान्तं चेद् भयकम्पितं वद तदा गच्छानि कस्याश्रयम् ।
नो वाञ्छामि धनं न वा सुभवनं त्वत्पादपद्मं शुभं
भीते चेतसि चिन्तयामि जननि त्रैलोक्यशर्मप्रदम् ॥ 4 ॥

ये नित्यं धनलिप्सया तव पदप्रान्ते नतिं कुर्वते
ये विद्यां बहुमानतां च वृणते ते प्राप्नुवन्त्येव तत् ।
ये भक्त्या तव पूजनं विदधते तैराप्यते गौरवं
त्वन्नामस्मरणं सदार्त्तिहरणं नो निष्फलं कर्हिचित् ॥ 5 ॥

त्वत्पादाम्बुजदर्शनप्रणयिनो लोकान् प्रदीपावलीं
प्रज्वाल्यार्थनतत्परान् प्रतिदिनं पश्यामि सेवापरान् ।
नित्यं भक्तिपरायणावनपरे भक्तिप्रदीपैर्मुदा
पूजां ते विदधामि यामि शरणं देवि प्रसन्ना भव ॥ 6 ॥

ध्यानं मानसचापलान्नघटते ज्ञानं न मे पूजने
नैवेद्यं विविधं प्रदातुमनिशं शक्तिर्न मेऽप्यम्बिके ।
त्वत्पादाम्बुजचिन्तने मम मतिं संप्रेरयाम्यन्वहं
किन्तु त्वत्करुणां विना न वलते सा मोहमायावशात् ॥ 7 ॥

जायन्ते मम मानसे बहुविधा भीतिप्रदाः कल्पना-
स्तच्चिन्तापरिपीडितोऽस्मि न लभे त्राणाय गत्यन्तरम् ।
वाणीं कर्णसुधां न कोपि वदति त्वाश्वासनादायिनीं
तस्मात्ते चरणं व्रजामि शरणं मातर्जगत्तारिणि ॥ 8 ॥

सर्वं मे हृदि काङ्क्षितं तव कृपालाभेन सिद्धिं गतं
त्वं मातर्मम पृष्ठतोऽसि सततं कारुण्यभावान्विता ।
जानीते सुतमानसं त्रिनयने का वा विना मातरं
तस्मान्मे हृदयं सदातिसदयं त्वच्चिन्तया पूर्यताम् ॥10॥

आरोग्यं तनुरेति केन विधिना तन्नैव विज्ञायते
तत्स्वास्थ्यं बहुधा विधातुमनिशं यत्नैः समायास्यते ।
को वा दास्यति मेऽभयं न च तथाभूतं लभेऽहं जनं
मातः केवलमाश्रये तव पदप्रान्तं जगत्पालनम् ॥11॥

त्वत्पादाम्बुजसेवकं सविनयं नित्यं नतं चिन्तितं
पुत्रं पातुमशेषदुःखजलधौ मज्जन्तमेकाकिनम् ।
नोचेत्ते करपङ्कजं शरणदं तद्रक्षणाय व्रजेत्
नानाभीतिकथाविचिन्तितमतिं त्रायेत को वाऽपरः ॥12॥

मातस्ते चरणाम्बुजे मम रतिः संजायतां सन्ततं
जाने तेन विपच्चयोऽतिभयदो नूनं लयं यास्यति ।
मद्भावं स्तवमान्तरं च नियतं ज्ञात्वाशु सिद्धिं शुभे
कार्ये दास्यसि लोकमङ्गलकरे देव्यम्बिके शक्तिदे ॥13॥

त्वं श्रीक्षेत्रमणिस्तवांशुकणिका लोके तमोनाशिनी
त्वं वाणी कविपुङ्गवैरहरहः संसेव्यसे सादरम् ।
त्वं लक्ष्मीर्धनरूपसौख्यवरदा वन्द्या बुधैःसर्वदा
कल्याणं जगतस्तवैव कृपयेत्याख्यान्ति विद्वद्वराः ॥14॥

अस्त्राघातभयं यदस्ति पुरतश्चित्तं ततो वेपते
तत्कष्टं हृदि भाययत्यविरतं शान्तं न मे मानसम् ।
धैर्यं देहि तदर्थमम्ब ! वरदे ! तस्मिन् क्षणे रक्षिणि
त्वं स्थित्वा परिपालयिष्यसि चिरं कार्यं भवेत् क्षेमदम् ॥15॥

मातर्मे निजचिन्तनं न घटते नैराश्यलाभः परं
त्वं यत्कामयसे तदेव सफलं संपद्यतेऽसंशयम् ।
त्वच्चिन्ता सफला यदीह नियतं नैव क्वचिन्मामकी
तद् यत्संघटते तदर्थमसकृत् किं वा वृथा चिन्तनैः ॥16॥

आर्त्तान् पासि नताँश्च रक्षसि सुतान् दुष्टान् सदा कूर्दसे
धूर्त्तांस्ताडयसि च्छलं कलयतो नित्यं खलान् हंस्यलम् ।
गर्वान्धान् विमदान् करोषि विमले पुत्रे कृपां वर्षसि
स्वान्तं त्वत्पदसेवने विदधतः संवर्धयस्यम्बिके ॥17॥

पश्याम्यम्ब ! सुतस्य दुःखवचनं श्रोतुं सदा तत्परा
बाधाजालविनाशने करुणया सद्यस्त्वमस्युद्यता ।
निश्चिन्तं निवसामि शोकरहितं चित्तं ततो मेऽधुना
जाने ते करुणाकटाक्षलहरी दीनान् सदा त्रायते ॥18॥

दुःखे ये निपतन्ति ते यदि सकृद्ध्यायन्ति ते श्रीपदं
तेषां दुर्दमदुःखदायिविपदः संचूर्णयस्यादरात् ।
का माता सुतरोदनं श्रुतिपथे सोढुं क्षणं वाञ्छति
त्राणार्थं निजशक्तिसाधनबलैः सद्यो न वाकांक्षते ॥19॥

देवि ! त्वत्करुणाबलेन शुभदं स्थानं समासादितं
तत्स्थानेऽभयदे भयं हृदि पुनः संजायते मेऽनिशम् ।
उत्सङ्गे शयनात्तु ते भयकथा नैव स्मृतौ वर्त्तते
ध्यायाम्याश्रयकारणात् तव पदं मातः कृपार्द्रा भव ॥20॥

जानाम्यम्ब ! कृपा तवास्ति शुभकृत्त्वत्सेवके सर्वदा
विघ्नौघैस्तवसेवकोऽपि विविधक्लेशाकुलोऽस्म्यन्वहम् ।
तद्विश्वासबलेन किन्तु जननि स्वान्तं सदाश्वासयन्
फूत्कारेण करालदुःखनिकरं तिष्ठामि विद्रावयन् ॥21॥

मातर्नानुभवामि ते लवमपि क्लेशं कृपालोकनात्
विश्वासोऽस्ति ममाखिलेप्सितमतो यायात् परं पूर्णताम् ।
त्वत्कारुण्यजलं पतत् सुविपुलं मद्दुःखदावानल-
ज्वालां घोरतरामलं प्रशमयेन्नास्त्यत्र मे संशयः ॥22॥

मातस्ते हृदयं सदातिसदयं यत्रानुकूलं भवेत्
रोगस्तस्य विनाशमेति रिपवो यान्ति क्षयं तत्क्षणात् ।
विघ्नो नाशमुपैति याति विलयं पापं शुभं वर्धते
त्वत्पादे शरणं व्रजाम्यनुदिनं का वाऽपरा त्वां विना ॥23॥

मातस्ते कृपया पुराणपुरुषः श्रीरामचन्द्रो वने
दुःखान्यर्बुदसंख्यकान्यपि भजन् स्तोकं न चित्तेऽनयत् ।
त्वच्चिन्ता दुरितौघनाशनकरी पुण्यप्रदा सर्वदा
ज्ञात्वैतन्मम चेन्मनो भययुतं तत्सोऽस्ति मे दुर्विधिः ॥24॥

विद्यायै सुधियो धनाय धनिकाः काव्याय कव्यग्रिमाः
शक्त्यै मल्लवरा जयाय रिपवो मोक्षाय योगीश्वराः ।
धीवृद्ध्यै बहुसाधकास्तव पदे मातः स्तुतिं कुर्वते
किन्त्वेकोऽहमशेषकर्मणि तव स्नेहं दयां चाश्रये ॥25॥

मायामोहकदम्बमूर्च्छितजनः प्राप्नोति यच्चेतनां
अज्ञानान्धकृतौ चलंश्च लभते यज्ज्ञानदीपं जनः ।
हृद्वृक्षे नवकल्पनाकिशलयं स्रष्टा च प्राप्नोति यन्
मातस्ते करुणासरिज्जलकणस्तत्रैकहेतुर्मतः ॥26॥

मातस्ते स्मरणं सदार्त्तिहरणं दुःखाद्रिविध्वंसनं
विद्याबुद्धिविवेकवर्धनकरं धैर्यप्रशान्तिप्रदम् ।
तेजःस्फूर्त्तिसुशक्तिदायकमसच्चिन्तासमुच्छेदकं
चित्तानन्दविधायकं शुभकरं सत्कल्पनोद्भावकम् ॥27॥

कायक्लेशफलेन दुःखितमना यज्जीवनं यापयन्
त्वन्नामस्मरणं करोमि तदलं पीडा न मां बाधते ।
चित्तं शान्तिमुपैति शक्तिरधिका देहे पुनर्जायते
सर्वं शोभनमेव हि त्रिनयने त्वत्पादसंसेवनात् ॥28॥

पीडा वृद्धिमुपैति यत्प्रथमतो न ज्ञायते तत्कथं
पश्चात् तत् परिणामतोऽतिमधुरं दुःखं सुखे लीयते ।
सर्वं शोभनमस्ति तत्परमहो धन्या दया तेऽम्बिके
बोद्धुं न प्रभवेदशेषकलुषैर्मग्ना मतिस्ते कृपाम् ॥29॥

जानास्यम्ब कृपा तवास्ति बहुला नोचेत् कथं मे तनुः
स्तोकं सुस्थतरास्ति पूर्वदिवसात् किं वाऽपरं कारणम् ।
इच्छा या समुदेति चेतसि च सा पूर्णा परस्मिन् क्षणे
तूर्णं सम्भवतीह लोकजननि त्वत्पादसंसेवनात् ॥30॥

ये यन्मां प्रवदन्तु तेन हृदये काचिन्न चिन्ता मम
ध्यानेनैकनिविष्टनिर्मलहृदा त्वं चिन्त्यसे सादरम् ।
त्वं जानास्यतिदुःखपीडितसुतत्राणाय किं साधनं
स्वस्था स्याच्च कथं नु मे तनुरतिक्षीणा विना ते कृपाम् ॥31॥

मातर्देवि दयामयि स्वचरणध्यातृप्रिये शक्तिदे
विद्यावुद्धिविवेकदायिनि महासौभाग्यसिद्धिप्रदे ।
नित्यं दुष्टमदान्धदर्पदलने शूलादिसंधारिणि
भव्ये मां प्रति ते कृपास्त्वविरतं स्वास्थ्याय शक्त्यै तथा ॥ 32 ॥

विद्यार्थी स्मृतिशक्तिमेति कुकविः शक्तिं च काव्योचितां
भूपालो नयशक्तिमर्च्चनपरः सन्मन्त्रशक्तिं द्विजः ।
वाक्शक्तिं च प्रवाचकः प्रखरधीशक्तिं विपश्चित्तथा
सद्वीरस्तनुशक्तिमेति जननि त्वत्पादपद्माश्रयात् ॥ 33 ॥

वेदे त्वं बहुचर्चितासि विपुलैः स्तोत्रैर्मुनीन्द्रैस्तथा
सर्वं रम्यतरं पुराणवचनं त्वद्वर्णने सुन्दरम् ।
हिन्दुः स्तौति तथा करोति यवनः खृष्टस्तथा सेवते
को मातस्तव वन्दनं न कुरुते श्रद्धान्वितो भूतले ॥34 ॥

मातुर्वन्दनकर्मधर्मनिपुणो नो केवलं मानव-
स्तिर्य्यग्योनिसमुद्भवोऽपि नियतं मात्रर्च्चने मोदते ।
सर्वे स्थावरजङ्गमप्रभृतयः शक्तिं विना कर्हिचित्
स्थातुं न प्रभवन्त्यसीमगुरुतालाभाय वाञ्छन्ति ताम् ॥ 35 ॥

मातस्त्वं यदि दातुमिच्छसि शुभं को वाऽशुभं धास्यति
त्वं चेत्त्राणपरायणा किमु विपत्पाशस्तदा स्थास्यति ।
त्वद्धस्ताम्बुजतोऽभयं यदि सकृत् कस्मैचिदायास्यति
स्वास्थ्यं भूतिरनेकधा च सुलभा तस्य ध्रुवं स्यात् शिवे ॥36 ॥

आकाशे खगवज्जलेषु झसवन्मार्गान्तरे वाजिवत्
कान्तारे गजवद् गिरौ हरिणवद् घोरे वने व्याघ्रवत् ।
वृक्षे वानरवत् क्षितौ शशकवद् गन्तुं सदा कामये
नो जाने गमनं कदातिसुखदं मातर्ममायास्यति ॥37 ॥

मन्ये मातरशेषदुःखदलने सर्वं त्वया कल्पितं
तेनाद्यानुभवामि शर्म सकलं कार्यं शुभं साधितम् ।
प्राप्ता कापि तनौ च शक्तिरधिकाऽकार्ये कदाचिन्मतिः
संयात्यम्बुजलोचनेऽनयगतां तां सर्वदा वारय ॥ 38 ॥

दुःखं त्वत्कृपया विनश्यति महासौख्यं परं वर्धते
चित्ते धर्मसुकर्मसाधनपरा चिन्ताऽनिशं राजते ।
पापे नैव मतिः कदापि वलते सत्ये रुचिर्जायते
दुष्टान् नाशयितुं मनः प्रयतते श्रद्धाऽऽगमे चैधते ॥ 39 ॥

देहो भाति सुशोभनोऽतिमधुरं चित्तं पुनर्निर्मलं
पीडा नैव तनौ गतिर्न विहता कार्याय पूर्णा स्पृहा ।
ग्रन्थान् पाठयितुं स्वयं च पठितुं श्रद्धा परा जायते
नो जाने कथमद्भुतं सुघटितं चित्रं क्षपामात्रतः ॥ 40 ॥

देहश्चेत् सबलः प्रसन्नमनिशं चित्तं क्षुधा शोभना
शक्तिः सर्वकरी स्मृतिश्च निशिता रात्रौ सुनिद्रा मुदा ।
संत्याज्यस्य विसर्जने कठिनता नैवं धनं सर्वदा
तद् जाने नरजीवनं सुरुचिरं मातस्ततः किं महत् ॥41 ॥

पूर्णं जीवनमस्तु मे सुमधुरं तूर्णं मतौ साहसं
कर्त्तव्यस्य च साधने धृतिरसच्चिन्तापहारे रतिः ।
सद्ग्रन्थाध्ययने रुचिः प्रतिदिनं विद्यार्थिसेवापरा
चिन्ता चेतसि राजतां तव कृपालाभेन मातःसदा ॥42 ॥

विद्वान् प्रार्थयते जयाय विदुषो राजा रिपोर्नाशने
बोद्धुं पाठकथां च शिष्यनिवहो जेतुं रणे नायकः ।
सत्काव्यं मधुरं मुदा रचयितुं प्राज्ञः कविर्याचते
याचे तेऽभयमुद्रयाऽतिरुचिरं हस्तं सदा वीक्षितुम् ॥ 43 ॥
नेत्रे ते कमनीयरूपमनिशं संदृश्यतां मोहनं
श्रोत्रे मे कुरुतां त्वदीयसुखदस्तोत्रे रतिं सर्वदा ।
हस्तौ ते परिपूजनाय भवतां मातः सदा तत्परौ
वक्त्रं ते करुणाकथां कथयितुं नित्योद्यतं वर्त्तताम् ॥44 ॥

सर्वं लब्धमिहैव ते करुणया सामर्थ्यमासादितं
प्राप्ता शक्तिरसाध्यसाधनविधौ किन्तु स्थिरं नो मनः ।
स्वास्थ्यं चेद्बुचिरं कृतं कथमहो नैवं तथा मानसं
सच्चिन्ताकरणेऽतितत्परतरं चित्तं चिरं कामये ॥45॥

स्तोत्रं ते मधुरं स्वरूपममलं चिन्ता विपन्नाशिनी
ध्यानं ते रुचिरं कृपातिशुभदा रूपं च नैराश्यहम् ।
सौधं ते वरदं प्रसादकणिका सौभाग्यसंवर्द्धिनी
माला ते तनुसङ्गता भयहरा मातः पदं मुक्तिदम् ॥46॥

सत्कार्ये मम मानसं नु वलतां लोकोपकारे मतिः
कर्त्तव्यस्य च साधने प्रतिदिनं शक्तिश्च संजागृयात् ।
पित्रोः पादयुगस्य सेवनविधौ नित्यं तनुर्वर्त्ततां
पूज्यानां परिपूजने च रमतां चित्तं जगत्पालिके ॥47॥

कश्चित्कामयते धनं सुविपुलं ज्ञानं च कश्चिन्महत्
कश्चिच्छक्तिमरिप्रहारविषये कश्चित्कवित्वं पुनः ।
वृत्तिं वाञ्छति कोऽपि तेऽंघ्रियुगलं संपूज्य भक्तप्रिये
तस्येच्छा परिपूर्यते त्वयि परा निष्ठास्ति यच्चेतसः ॥48॥

कृत्वा तातवचः प्रसन्नमनसा पूज्यान् सदा पूजयन्
विस्मृत्यान्यकथां स्वलक्ष्यविषये यस्तत्परः सन्ततम् ।
कष्टं यः सहते स्वसाधनपथे बाधां समुल्लङ्घते
तस्याशां परिपूरयस्यनुदिनं प्रत्यक्षमेतद्धि नः ॥ 49॥

दुःखौघैः परिषीदतोऽसि जननि त्वं सर्वदैवाश्रयः
कार्ये योऽसफलोऽस्ति तस्य सततं त्वं सर्वदालम्बनम् ।
एवं दुर्बलमानसस्य शरणं त्वत्पादपद्मं सदा
कः पुत्रो जननीं विहाय लवमप्याकांक्षते जीवितुम् ॥50॥

विद्या याऽधिगता मया जननि सा त्वत्पादयोर्दीयते
लब्धं मे धनमर्पयामि तव तत् स्वत्त्वं न तत्रास्ति मे ।
प्राप्तं मानधनं यदेव विपुलं तत्ते परं नैव मे
सर्वं मेऽपरमस्ति यत्तदिह ते सर्वं समुत्सृज्यते ॥51॥

यस्मिंस्ते करुणाऽरुणांघ्रिललिते तस्यामला भावना
चिन्तात्यन्तमनोहरा जनमनःसन्तोषणं भाषणम् ।
कार्य्याण्यार्य्यजनोचितानि जनतामोदावहा साधना
बुद्धिः शुद्धतरा मनः शिवमयं शर्मप्रदं दर्शनम् ॥52॥

ध्याने ते मधुराकृतिः स्मृतिपथे त्वन्मन्दिरं सुन्दरं
ज्ञाने ते नतलोकतारणकथा चित्ते कृपापालनम् ।
चिन्तायां दनुजेन्द्रनाशविषयो बुद्धौ महद्रक्षणं
स्तोत्रं श्रोत्रयुगे जनन्यविरतं स्थानं करोत्यम्बिके ॥53॥

उत्तालोर्मिसमाकुलस्य जलधेर्मध्ये यथा वर्त्तते
नौका जीवनमस्ति सेऽतिविकलं संसारसिन्धौ तथा ।
चीत्कारः परिदेवनं प्ररुदितं केनापि नाकर्ण्यते
याचे ते शरणं ततोऽतिकरुणं मातर्न गत्यन्तरम् ॥54॥

आशापुष्करिणी विशुष्यति सदा चिन्तालता लम्बते
ज्ञानेन्दुर्मलिनीभवत्यनुदिनं दुःखाम्बुधिर्वर्धते ।
नित्यं धैर्य्यतरुर्विपत्तिपवनैः संवेपते किं पुन-
र्वक्तव्यं तव सर्वशक्तिवरदे सौभाग्यशान्तिप्रदे ॥55॥

उद्यत्खड्गकरे करालवदने मुण्डास्थिमालाधरे
भास्वद्वह्निशिखाप्रदीप्तनयने प्रोन्मुक्तकेशाम्बरे ।
गर्जद्भीममृगेन्द्रवाहनवरे त्रैलोक्यपीडाहरे
भक्तानां दुरितौघनाशनपरे मां पाहि रम्यान्तरे ॥56॥

देवास्ते परिपूजनं कृतयुगे चक्रुर्महासंकटे
त्रेतायां रघुनन्दनश्च विदधौ सेवां रिपून्मूलने ।
पूजा ते विहितार्जुनेन महती सत्सङ्गरे द्वापरे
लोकाश्चात्र कलौ विपत्तिसमये संपूजयन्त्यातुराः ॥57॥

ध्यानं ते न फलप्रदं यदि तदा सम्यङ् न तत्कल्पितं
पूजा ते न शुभप्रदा यदि तदा भक्त्या न सम्पादिता ।
स्तोत्रं ते हृदयं न चुम्बति तु चेन्न त्वत्परं तन्मनः
सर्वं वै सफलं भवेत्त्वयि यदा विश्वासपूर्णा मतिः ॥58॥

दुःखं नश्यति भीषणं प्रतिदिनं धैर्य्यं शनैर्जायते
शास्त्रालोचनजं प्रमोदजननं ज्ञानामृतं पीयते ।
चित्तं याति शुभे समुन्नतिपथे मोदाम्बुधिर्वर्धते
सर्वं ते कृपयाम्बिके परमया संपद्यते मेऽधुना ॥59॥

चन्द्रे शीतलता रवौ प्रखरता वैश्वानरे चोष्णता
पुष्पे सौरभयुक्तता तरुगणे रम्या हरिद्वर्णता ।
साधौ सज्जनता शिशौ मधुरता धेनौ पयःपूर्णता
त्वद्भासा परिशोभते त्रिभुवने सर्वत्र ते संस्थितिः ॥60॥

ईर्ष्या नृत्यति चेतसि प्रतिदिनं स्वार्थस्य संसाधने
चिन्ता पापपथेऽनुधावति सदा लोभस्य निर्देशतः ।
कर्त्तव्ये तनुपीडनं न सहते चित्तं सुखाकाङ्क्षया
मातर्देहि मनस्ततोऽति कठिनं यत्सत्पथेषु व्रजेत् ॥61॥

सर्वानिष्टनिवारणाय विबुधैः संसेव्यते यत्पदं
स्रष्टा सृष्टिसुरक्षणाय सततं यच्छक्तिमालम्बते ।
कष्टं सङ्कटकालजं शमयितुं यस्यां जनानां नतिः
स्पष्टं सा न परा त्रिलोकजननि प्रज्ञाप्रदे त्वां विना ॥62॥

लोकानां परिरक्षणाय विपदो यत्सर्वदा तत्परं
विघ्नौघस्य विनाशने सुमनसां यच्चानिशं सत्वरम् ।
त्रातुं रोगजपीडनात् प्रतिदिनं छेत्तुं महद्बन्धनं
शक्तं यत्करभूषणं तव शुभं चक्रं सदा पातु तत् ॥63॥

यामालोकयतां प्रसन्नमनिशं पापैर्विमुक्तं मनः
या कान्त्या तव चोज्वला सुमनसां चेतस्तमोनाशिनी ।
दुर्वृत्तैश्च करालकालभुजगीरूपैव या मन्यते
सा माला तनुसङ्गता तव जगन्मातर्मया नम्यते ॥64॥

त्वामाश्रित्य परां मुदा परमया लब्धा मया सुस्थता
कष्टं स्पष्टतया वदामि न मया स्पृष्टं धनप्राप्तये ।
वृत्तिश्चित्तगताऽभवत्करगता त्वत्पादपूजाबलात्
मातस्ते कृपया समोन्नतिपथः संजायतां पुष्पितः ॥65॥

नित्यं कार्य्यवशादशान्तमनसा मातर्मया धावता
दत्ता नैव मतिः कृता न च रतिः सेवाततिर्न त्वयि ।
ध्यातं नैव पदारविन्दयुगलं मन्दस्मिते सुन्दरं
दोषान् रोषवशान्न मे गणय तान् त्रैलोक्यशान्तिप्रदे ॥66॥

यं श्रुत्वा विबुधा मुदा तव पदाम्भोजे रतिं कुर्वते
यो द्राक् चेतसि कम्पनं वितनुते पापात्मनां सन्ततम् ।
आकर्ण्य प्रणतिं सदा विदधते धर्मैकचित्ताश्च यं
मातस्ते जनतापनाशनरतः पायात्स शङ्खध्वनिः ॥67॥

निर्मात्यद्भुतचित्रजालमनिशं शिल्पी, कला तत्र या
विद्वान् भाषणवर्षणं प्रकुरुते तत्रास्ति या कल्पना ।
यन्त्री यन्त्रमनेकधा वितनुते तत्रास्ति या प्रेरणा
सा त्वं देवि तव स्वरूपममुना क्षुद्रेण किं कल्प्यते ॥68॥

मल्लस्यामितविक्रमे नटनटीचेतोहरे नर्त्तने
सिद्धस्यागमदर्शने कविवरस्यात्यद्भुते कल्पने ।
धीरस्याभ्रमचिन्तने नयवतां तोषप्रदे शासने
पश्याम्यम्बुजलोचने तव सदा शक्तिर्नु लीलायते ॥69॥

मातस्त्वच्चरणाश्रितस्य कविता दुष्टा भवेन्मामकी
जाने साऽप्यवहेलिता नहि भवेन्नूनं जनन्या त्वया ।
पुत्रस्यास्फुटवाक्कलापमिते श्रुत्वा न किं सादरं
नद्वाञ्छापरिपूरणं प्रकुरुते माता सदा तत्परा ॥70॥

विश्वासं त्वयि निश्चितं प्रविदधन्मिश्रः प्रमोदोऽधुना
भीतिव्रातमपाकरोति मनसः सर्वं जगत्पालिके ।
पृष्ठे तेऽभयदायिहस्तवशतो नो दृश्यतेऽसौ मया
जाने त्वत्करुणां विनाम्ब नियतं नैवोदयः कस्यचित् ॥71॥

श्रीदुर्गाकरुणालवाय खलु चेच्चित्ते स्पृहा कस्यचिद्
देवीस्तोत्रमिदं पठेन्नियमतो भक्त्यानतः सन्ततम् ।
भावं वीक्ष्य दयावती सुतनये नूनं प्रसन्ना सती
दास्यत्येव मनोऽनुरूपमखिलं सङ्कल्पितं सत्फलम् ।।72।।

इति श्रीपुरीस्थित- श्रीजगन्नाथसंस्कृतविश्वविद्यालय - स्नातकोत्तरसाहित्यविभाग प्राध्यापकेन अनुवादचन्द्रिका-प्रथमसंस्कृत-संस्कृतसमीक्षा-जगतिकेवल-उत्कलगौरव-पालीप्राकृतदर्पण-श्रीमन्दिरेशशतक-राजकवि कविपण्डित मिश्रगदाधरपद्यावलीसमीक्षा-मायानाटकवृत्ता (पुरी) खोर्धामण्डलान्तर्गत ''हलदिआ-भगवानपुरशासन'' वास्तव्येन मालती-गदाधर-तनुजेन मिश्रोपाह्वकेण प्रमोदचन्द्राभिधेन भरद्वाजगोत्रोद्भवेन द्विजन्मना चतुर्नवत्यधिकैकोनविंशशतमिते खृष्टाब्दे श्रीजगन्नाथपुर्य्यां विरचिता विमलालहरी समाप्ता ।

❑❑❑